✧˖┈°*❋ ❋*°┈˖✧

# श्री नारायण कवच

## (নারাযণ কবচম্)

# Shri Narayan Kavach

## (in bengali)

–( শ্রীমদ্ভাগবত স্কংধ 6)

✧˖┈°*❋ ❋*°┈˖✧

# নারাযণ কবচম্

**ন্যাসঃ**

**অংগন্যাসঃ**

ওং ওং পাদযোঃ নমঃ ।
ওং নং জানুনোঃ নমঃ ।
ওং মোং ঊর্বোঃ নমঃ ।
ওং নাং উদরে নমঃ ।
ওং রাং হৃদি নমঃ ।
ওং যং উরসি নমঃ ।
ওং ণাং মুখে নমঃ ।
ওং যং শিরসি নমঃ ।

**করন্যাসঃ**

ওং ওং দক্ষিণতর্জন্যাং নমঃ ।
ওং নং দক্ষিণমধ্যমাযাং নমঃ ।
ওং মোং দক্ষিণানামিকাযাং নমঃ ।
ওং ভং দক্ষিণকনিষ্ঠিকাযাং নমঃ ।
ওং গং বামকনিষ্ঠিকাযাং নমঃ ।
ওং বং বামানিকাযাং নমঃ ।
ওং তেং বামমধ্যমাযাং নমঃ ।
ওং বাং বামতর্জন্যাং নমঃ ।
ওং সুং দক্ষিণাংগুষ্ঠোর্ধ্বপর্বণি নমঃ ।
ওং দেং দক্ষিণাংগুষ্ঠাধঃ পর্বণি নমঃ ।
ওং বাং বামাংগুষ্ঠোর্ধ্বপর্বণি নমঃ ।
ওং যং বামাংগুষ্ঠাধঃ পর্বণি নমঃ ।

## বিষ্ণুষডক্ষরন্যাসঃ

ওং ওং হৃদযে নমঃ ।
ওং বিং মূর্ধ্নে নমঃ ।
ওং ষং ভ্রুর্বোর্মধ্যে নমঃ ।
ওং ণং শিখাযাং নমঃ ।
ওং বেং নেত্রযোঃ নমঃ ।
ওং নং সর্বসংধিষু নমঃ ।
ওং মঃ প্রাচ্যাং অস্ত্রায ফট্ ।
ওং মঃ আগ্নেয্যাং অস্ত্রায ফট্ ।
ওং মঃ দক্ষিণস্যাং অস্ত্রায ফট্ ।
ওং মঃ নৈঋত্যে অস্ত্রায ফট্ ।
ওং মঃ প্রতীচ্যাং অস্ত্রায ফট্ ।
ওং মঃ বাযব্যে অস্ত্রায ফট্ ।
ওং মঃ উদীচ্যাং অস্ত্রায ফট্ ।
ওং মঃ ঐশান্যাং অস্ত্রায ফট্ ।
ওং মঃ ঊর্ধ্বাযাং অস্ত্রায ফট্ ।
ওং মঃ অধরাযাং অস্ত্রায ফট্ ।

## শ্রী হরিঃ

অথ শ্রীনারাযণকবচ

**॥রাজোবাচ॥**

যযা গুপ্তঃ সহস্ত্রাক্ষঃ সবাহান্ রিপুসৈনিকান্।
ক্রীডন্নিব বিনির্জিত্য ত্রিলোক্যা বুভুজে শ্রিযম্॥1॥

ভগবংস্তন্মমাখ্যাহি বর্ম নারাযণাত্মকম্।
যথাস্স্ততাযিনঃ শত্রূন্ যেন গুপ্তোস্জযন্মৃধে॥2॥

## ॥শ্রীশুক উবাচ॥

বৃতঃ পুরোহিতোস্ত্বাষ্ট্রো মহেংদ্রাযানুপৃচ্ছতে।
নারাযণাখ্যং বর্মাহ তদিহৈকমনাঃ শৃণু॥3॥

বিশ্বরূপ উবাচধৌতাংঘ্রিপাণিরাচম্য সপবিত্র উদঙ্ মুখঃ।
কৃতস্বাংগকরন্যাসো মংত্রাভ্যাং বাগ্যতঃ শুচিঃ॥4॥

নারাযণমযং বর্ম সংনহ্যেদ্ ভয আগতে।
পাদযোর্জানুনোরূর্বোরূদরে হৃদ্যথোরসি॥5॥

মুখে শিরস্যানুপূর্ব্যাদোংকারাদীনি বিন্যসেত্।
ওং নমো নারাযণাযেতি বিপর্যযমথাপি বা॥6॥

করন্যাসং ততঃ কুর্যাদ্ দ্বাদশাক্ষরবিদ্যযা।
প্রণবাদিযকারংতমংগুল্যংগুষ্ঠপর্বসু॥7॥

ন্যসেদ্ হৃদয ওংকারং বিকারমনু মূর্ধনি।
ষকারং তু ভ্রুবোর্মধ্যে ণকারং শিখযা দিশেত্॥8॥

বেকারং নেত্রযোর্যুংজ্যান্নকারং সর্বসংধিষু।
মকারমস্ত্রমুদ্দিশ্য মংত্রমূর্তির্ভবেদ্ বুধঃ॥9॥

সবিসর্গং ফডংতং তত্ সর্বদিক্ষু বিনির্দিশেত্।
ওং বিষ্ণবে নম ইতি ॥10॥

আত্মানং পরমং ধ্যাযেদ ধ্যেযং ষট্শক্তিভির্যুতম্।
বিদ্যাতেজস্তপোমূর্তিমিমং মংত্রমুদাহরেত ॥11॥

ওং হরির্বিদধ্যান্মম সর্বরক্ষাং ন্যস্তাংঘ্রিপদ্মঃ পতগেংদ্রপৃষ্ঠে।
দরারিচর্মাসিগদেষুচাপাশান্ দধানোস্ষ্টগুণোস্ষ্টবাহুঃ ॥12॥

জলেষু মাং রক্ষতু মত্স্যমূর্তির্যাদোগণেভ্যো বরূণস্য পাশাত্।
স্থলেষু মাযাবটুবামনোস্ব্যাত্ ত্রিবিক্রমঃ খেঽবতু বিশ্বরূপঃ ॥13॥

দুর্গেষ্বটব্যাজিমুখাদিষু প্রভুঃ পাযান্নৃসিংহোঽসুরযুথপারিঃ।
বিমুংচতো যস্য মহাট্টহাসং দিশো বিনেদুর্ন্যপতংশ্চ গর্ভাঃ ॥14॥

রক্ষত্বসৌ মাধ্বনি যজ্ঞকল্পঃ স্বদংষ্ট্রযোন্নীতধরো বরাহঃ।
রামোঽদ্রিকূটেষ্বথ বিপ্রবাসে সলক্ষ্মণোস্ব্যাদ্ ভরতাগ্রজোস্স্মান্ ॥15॥

মামুগ্রধর্মাদখিলাত্ প্রমাদান্নারাযণঃ পাতু নরশ্চ হাসাত্।
দত্তস্ত্বযোগাদথ যোগনাথঃ পাযাদ্ গুণেশঃ কপিলঃ কর্মবংধাত্ ॥16॥

সনত্কুমারো বতু কামদেবাদ্ধযশীর্ষা মাং পথি দেবহেলনাত্।
দেবর্ষিবর্যঃ পুরূষার্চনাংতরাত্ কূর্মো হরির্মাং নিরযাদশেষাত্ ॥17॥

ধন্বংতরির্ভগবান্ পাত্বপথ্যাদ্ দ্বংদ্বাদ্ ভযাদৃষভো নির্জিতাত্মা।
যজ্ঞশ্চ লোকাদবতাজ্জনাংতাদ্ বলো গণাত্ ক্রোধবশাদহীংদ্রঃ ॥18॥

দ্বৈপাযনো ভগবানপ্রবোধাদ্ বুদ্ধস্তু পাখংডগণাত্ প্রমাদাত্।
কল্কিঃ কলে কালমলাত্ প্রপাতু ধর্মাবনাযোরূকৃতাবতারঃ ॥19॥

মাং কেশবো গদযা প্রাতরব্যাদ্ গোবিংদ আসংগবমাত্তবেণুঃ।
নারাযণ প্রাহ্ণ উদাত্তশক্তির্মধ্যংদিনে বিষ্ণুররীংদ্রপাণিঃ ॥20॥

দেবোস্পরাহ্নে মধুহোগ্রধন্বা সাযং ত্রিধামাবতু মাধবো মাম্।
দোষে হৃষীকেশ উতার্ধরাত্রে নিশীথ একোস্বতু পদ্মনাভঃ ॥21॥

শ্রীবত্সধামাপররাত্র ঈশঃ প্রত্যূষ ঈশোঽসিধরো জনার্দনঃ।
দামোদরোঽব্যাদনুসংধ্যং প্রভাতে বিশ্বেশ্বরো ভগবান্ কালমূর্তিঃ ॥22॥

চক্রং যুগাংতানলতিগ্মনেমি ভ্রমত্ সমংতাদ্ ভগবত্প্রযুক্তম্।
দংদগ্ধি দংদগ্ধ্যরিসৈন্যমাসু কক্ষং যথা বাতসখো হুতাশঃ ॥23॥

গদেঽশনিস্পর্শনবিস্ফুলিংগে নিষ্পিংঢি নিষ্পিংঢ্যজিতপ্রিযাসি।
কূষ্মাংডবৈনাযকযক্ষরক্ষোভূতগ্রহাংশ্চূর্ণয চূর্ণযারীন্ ॥24॥

ত্বং যাতুধানপ্রমথপ্রেতমাতৃপিশাচবিপ্রগ্রহঘোরদৃষ্টীন্।
দরেংদ্র বিদ্রাবয কৃষ্ণপূরিতো ভীমস্বনোঽরের্হৃদযানি কংপযন্ ॥25॥

ত্বং তিগ্মধারাসিবরারিসৈন্যমীশপ্রযুক্তো মম ছিংধি ছিংধি।
চর্মংছতচংদ্র ছাদয দ্বিষামঘোনাং হর পাপচক্ষুষাম্ ॥26॥

যন্নো ভযং গ্রহেভ্যো ভূত্ কেতুভ্যো নৃভ্য এব চ।
সরীসৃপেভ্যো দংষ্ট্রিভ্যো ভূতেভ্যোংঽহোভ্য এব বা ॥27॥

সর্বাণ্যেতানি ভগন্নামরূপাস্ত্রকীর্তনাত্।
প্রযাংতু সংক্ষযং সদ্যো যে নঃ শ্রেযঃ প্রতীপকাঃ ॥28॥

গরূড্ক্ষো ভগবান্ স্তোত্রস্তোভশ্ছংদোমযঃ প্রভুঃ।
রক্ষত্বশেষকৃচ্ছ্রেভ্যো বিষ্বক্সেনঃ স্বনামভিঃ ॥29॥

সর্বাপদ্ভ্যো হরের্নামরূপযানাযুধানি নঃ।
বুদ্ধিংদ্রিযমনঃ প্রাণান্ পাংতু পার্ষদভূষণাঃ ॥30॥

যথা হি ভগবানেব বস্তুতঃ সদ্সচ্চ যত্।
সত্যনানেন নঃ সর্বে যাংতু নাশমুপাদ্রবাঃ ॥31॥

যথৈকাত্ম্যানুভাবানাং বিকল্পরহিতঃ স্বযম্।
ভূষণাযুদ্ধলিংগাখ্যা ধত্তে শক্তীঃ স্বমাযযা ॥32॥

তেনৈব সত্যমানেন সর্বজ্ঞো ভগবান্ হরিঃ।
পাতু সর্বৈঃ স্বরূপৈর্নঃ সদা সর্বত্র সর্বগঃ ॥33

বিদিক্ষু দিক্ষূর্ধ্বমধঃ সমংতাদংতর্বহির্ভগবান্ নারসিংহঃ।
প্রহাপয~ংল্লোকভযং স্বনেন গ্রস্তসমস্ততেজাঃ ॥34॥

মঘবন্নিদমাখ্যাতং বর্ম নারযণাত্মকম্।
বিজেষ্যস্যংজসা যেন দংশিতোঽসুরযূথপান্ ॥35॥

এতদ্ ধারযমাণস্তু যং যং পশ্যতি চক্ষুষা।
পদা বা সংস্পৃশেত্ সদ্যঃ সাধ্বসাত্ স বিমুচ্যতে ॥36॥

ন কুতশ্চিত ভযং তস্য বিদ্যাং ধারযতো ভবেত্।
রাজদস্যুগ্রহাদিভ্যো ব্যাঘ্রাদিভ্যশ্চ কর্হিচিত্ ॥37॥

ইমাং বিদ্যাং পুরা কশ্চিত্ কৌশিকো ধারযন্ দ্বিজঃ।
যোগধারণযা স্বাংগং জহৌ স মরূধন্বনি ॥38॥

তস্যোপরি বিমানেন গংধর্বপতিরেকদা।
যযৌ চিত্ররথঃ স্ত্রীর্ভির্বৃতো যত্র দ্বিজক্ষযঃ ॥39॥

গগনান্ন্যপতত্ সদ্যঃ সবিমানো হ্যবাক্ শিরাঃ।
স বালখিল্যবচনাদস্থীন্যাদায বিস্মিতঃ।
প্রাস্য প্রাচীসরস্বত্যাং স্নাত্বা ধাম স্বমন্বগাত্ ॥40॥

## ॥শ্রীশুক উবাচ॥

য ইদং শৃণুযাত্ কালে যো ধারযতি চাদৃতঃ।
তং নমস্যংতি ভূতানি মুচ্যতে সর্বতো ভযাত্ ॥41॥

এতাং বিদ্যামধিগতো বিশ্বরূপাচ্ছতক্রতুঃ।
ত্রৈলোক্যলক্ষ্মীং বুভুজে বিনির্জিত্যঽমৃধেসুরান্ ॥42॥

॥ইতি শ্রীনারাযণকবচং সংপূর্ণম্॥

**–( শ্রীমদ্ভাগবত স্কংধ 6)**